# Hari Stotram

# શ્રીશાણ્ડિલ્યકૃતં હરિસ્તોત્રમ્

## Document Information

Text title : Hari Stotram

File name : shANDilyakRRitaharistotram.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : Manish Gavkar

Latest update : September 24, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# શ્રીશાણ્ડિલ્યકૃતં હરિસ્તોત્રમ્

શ્રીશાણ્ડિલ્ય ઉવાચ ।
અથ વક્ષ્યે હરિસ્તોત્રં પાવનં દુઃખનાશનમ્ ।
ભુક્તિમુક્તિપ્રદં ચાન્ત્યે ભક્તિતત્ત્વાર્થસઙ્ગતિમ્ ॥ ૧॥

શ્રીમાન્ પુમાન્ સ ભગવાન્ નિગમાભિગીતઃ
શેષાદ્યશેષસુરપુઙ્ગવસેવિતાઙ્ઘ્રિઃ ।
સ સ્વે મહિમ્ન્યભિરતઃ સ્વયમાપ્તકામ-
સ્તસ્મૈ નમો ભગવતે મહતે સદૈવ ॥ ૨॥

એકોઽપ્યનેકરચનારચનાત્પુરાસીત્
સચ્ચિત્સુખૈકઘનમૂર્તિરમૂર્તિરાદ્યઃ ।
સામ્યાતિશાયરહિતો નિજરાધસા ય-
સ્તસ્મૈ નમો ભગવતે મહતે સદૈવ ॥ ૩॥

સ્વાત્મૈકનિર્વૃતિરસં રસિતું સ્વકીય-
માનન્દમાત્રમમલં મિથુનં જજાન ।
તસ્યાનુરૂપરમણે રમણાત્મના ય-
સ્તસ્મૈ નમો ભગવતે મહતે સદૈવ ॥ ૪॥

યસ્માદ્બભૂવ વપુષા વચસા હૃદાપિ
કાલસ્વભાવકૃતિવિપ્રકૃતિઃ પ્રપઞ્ચઃ ।
જીવાઃ સુરાસુરવિધા મમ ગમ્ય યત્ર
તસ્મૈ નમો ભગવતે મહતે સદૈવ ॥ ૫॥

યસ્મિન્સ્વધર્મચરણાવરણોદિતેન
ધર્મેણ તેન ચ હુતપ્રહુતાદિગેન ।
નિર્ધૂય કર્મ સમલં વિમલા રતાઃ સ્યુ-
સ્તસ્મૈ નમો ભગવતે મહતે સદૈવ ॥ ૬॥

શેષાદ્યુપાસ્ય વિબુધૈઃ સમુપાસનીયં
    પાદ્માદિદેશિકરુપદિષ્ટમાર્ગમ્ ।
પ્રાપ્નોતિ યં શ્રુતિમતં હૃદિ વાસુદેવં
    તસ્મૈ નમો ભગવતે મહતે સદૈવ ॥ ૭॥

નો યાન્તિ યં પ્રવચનૈર્હવનૈસ્તપોભિ-
    ર્યોગપ્રયોગવિતતૈર્ભજનાદપેતૈઃ ।
પાદામ્બુજાશ્રયવતાં શ્રયણં ચ હિત્વા
    તસ્મૈ નમો ભગવતે મહતે સદૈવ ॥ ૮॥

વજ્રાઙ્કુશધ્વજમુખૈરભિલક્ષિતસ્ય
    યત્પાદપઙ્કજયુગસ્ય સદાભયસ્ય ।
તન્મૂલકર્મ રજસોઽસ્ય ગ્રહસ્ય કર્મ
    તસ્મૈ નમો ભગવતે મહતે સદૈવ ॥ ૯॥

સ્નાતો વિરક્તિસુગણેન યશોગુણેન
    આમોદિતઃ સ્વમહિમા સમલઙ્કૃતો યઃ ।
જ્ઞાનામૃતેન ચકિતશ્ચકિતઃ શ્રિયાપિ
    તસ્મૈ નમો ભગવતે મહતે સદૈવ ॥ ૧૦॥

ઇતિ શ્રીમદ્ધરિસ્તોત્રં પ્રાતરુત્થાય યઃ પઠેત્ ।
સર્વપાપવિશુદ્ધાત્મા હરિલોકં સ ગચ્છતિ ॥ ૧૧॥

ઇતિ શ્રીશાણ્ડિલ્યસંહિતાયાં પઞ્ચમે ભક્તિખણ્ડે ષોડશોઽધ્યાયે
    હરિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Manish Gavkar

*Hari Stotram*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*